(1.H)–100

Mahamahopadhyaya

HARAPRASAD SASTRI

M. A., C. I. E.

26, Pataldanga Street,

Calcutta .... 191 .

Preferably called Rugviniścaya

No. 8. Nidāna or Pathology. The Chapter on Grahaṇī or Chronic Diarrhoea [or dysentery] only. Three leaves, marked 1. 2. 3. Country made paper. 3 leaves Lines 13 on a page. Devanāgara of the 19th Century.

It is a commentary on the work not the work itself

This is a fragment of an extensive and well known work entitled the Nidāna by Mādhavakara.

at the end a small leaf with some medical notes

There is a complete MS. of this work in the Bodleian (MS. Wilson 42) & one incomplete MS.

The section on Grahaṇī is on fols. 9 & 10

See Aufrecht's Catal. of the Bodl. Sansk. MSS. p. 312

23. vi. 19

MADHAVA, son of Indukara.

100. Sanskrit MS. in Devanāgarī characters, on country-made paper: undated but written in the 19th cent.: 9½ × 5½ in., 4 leaves.

Fragment of a commentary on the extensive and well-known medical work of Mādhava, entitled Rugviniścaya or Nidāna: Pathology. The fragment deals with the chapter on Grahaṇī (chronic diarrhoea or dysentery) only, occupying 3 leaves; a smaller 4th leaf contains medical notes.

There is a complete MS. of the orig. work in the Bodleian (MS. Wilson 42), besides an incomplete one.

100

श्लोकैः आदिशब्दात् विधिलमधुरादिग्रहणं अतिभोजनात् अतिमात्रभोजनात् ननु भुक्तमात्रस्य च स्वप्नाद्वह्य
ग्निः कुपितः कफ इति रुध्यतः स्वप्नोत्र दिवास्वप्नो ग्राह्यो रात्रिस्वप्नस्य स्वास्थ्यहेतुत्वात् दिवास्वप्नश्च स्रोतःसम्मीलनेन जठ
रानलं संधुक्षयति अत एवातिसारिणामजीर्णानां च दिवास्वापो हित इति उच्यते भुक्तवतां दिवास्वापोऽत्यंतकफव
ध्याग्निं हंति अभुक्तवतां च दिवास्वापोऽग्निं संधुक्षयति यदुक्तं नरान्निरशनात्कामं दिवास्वापयेदिति तस्य रोगि
णो ग्रहणीरोगे पाडुः स्वं यथा भवति स एवमन्नं पच्यते इत्यादयो भवंतीति शेषः आस्योपलेपमाधुर्यमिति माधु
र्यमिति मुखस्य लिप्तत्वं मधुरत्वं च श्लेष्मरोगवशात् अन्नं प्रतापूरितमिव स्तिमितं विवर्द्ध निश्चलं च गुरु गौरवयुक्तम् उद
रं दुष्टो विकृतो मधुरश्च सदनमवसादो अंगानां स्त्रीषु हर्षणं स्त्रीरिंसाया अभावः भिन्नं च तत्त्वामश्लेष्मा
भ्यां संसृष्टं च यद्गुरु गौरवयुक्तं वर्चः पुरीषं तस्य प्रवर्तनं गुदे भवति भिन्नं विदीर्णमित्यर्थः दौर्बल्यमसामर्थ्यं कफा
त्मके ग्रहणीरोगे शिष्यहितैषिता या प्रक्रांतिसमसमवेतत्वेन स्वगमायाः अपि त्रिदोषग्रहण्या अपि देशेन लक्षण
माह पृथगित्यादि पृथग्वातादिभिर्निर्दिष्टानि हेतुलिंगानि तेषां समागमे एकत्र मीलने एवंप्रकारे त्रिदो
षग्रहणीरोगं निर्दिशेदिति दिशेत्कथयेद्भिषगिति शेषः संपूर्णश्लोकानुरोधात्तेषां वक्ष्यामि भेषजमिति
लिखितं ग्रहणीदुष्टा ग्रहण्याश्रितवह्नेरपि दुष्टिः अग्निमांद्यादयोपि ग्रहणीरोगा उच्यंते यदुक्तं च रके
यश्चाग्निः पूर्वमुद्दिष्टो रोगानीके चतुर्विधः तं चापि ग्रहणीरोगे समवर्ज्यं प्रवक्ष्यते इति विभागेन तस्य चोक्ता ये
विषमाद्यास्त्रयोग्नयः तेपि स्युर्ग्रहणीरोगाः समस्तु स्वास्थ्यकारणं इति ग्रहणीनिदानं

कृष्णुर्वो संधिः उरूपीडा साच पार्श्वादिभिः संबध्यते विसूचिका ऊर्ध्वमधश्चास्तामलप्रवृत्तिः कार्श्यं दु
र्बलांगता दुर्बलमसामर्थ्यं रूपादिग्रहणेचक्षुरादेसामर्थ्यमितिवा वैरस्यं विरसता अरुचिः श्र
द्धयाभ्यावः परिकर्तिका गुदेपरिकर्तनपीडा गृध्धिः कांक्षा सर्वरसानां मधुरादीनां कर्मणिषष्ठि एतच्चा
वातदूषितोतः करणत्वेनव्याधिमन्यावा सदनमवसादः मनोग्लानिः आध्मानं जीर्णेजीर्यति सतिचात्मइति
शेषः सवातगुल्महृद्रोगप्लीहाशंकीति वातगुल्मादियुक्तत्वात्तद्वर्णिका इदं मुख्यं दुःखं यया भवति एवं चिरा
त् कदाचिद्द्रवं कदाचिच्छुष्कं तनु अल्पं शब्दफेणावत् शब्दफेणाभ्यां सहितं वर्चः पुरीषं रोगी मानवः सृजेन्मुंचेत्
इदानीं निदानपूर्वकं पित्तपित्तग्रहणीमाह कट्वजीर्णेत्यादि अजीर्णमपक्वं विदाही विदाहजनकं वंशकरीरा
दि अम्लं यद्द्रव्यं क्षारोऽपामार्गक्षतः क्षारोदकसाधितं व्यंजनं मर्श्नंतिका मरूपा पौरदेशवा तथाक्षारोप
वक्षार. तथा सक्षारश्चद्रव्यं आद्यशब्दात्लवणतीक्ष्णोष्णानां ग्रहणं एतैः कारणैरुल्बणं वृद्धं
पित्तमनलं क्षीणवायदभिभवत्यतीति नपित्तमाग्नेयमग्निश्च वृद्धिमाप्नोतितत्कथं हंतीत्याह जलं तप्तमि
वानलामिति यथोत्कटगुणायुक्तमपिजलमग्निं हंति तथा प्रवांशपीवृद्धंपित्तमग्निस्वरूपमग्निं हंत्येवेति सपि
त्ताभापुरुषः अजीर्णमपक्वं नीलपीताभं सार्यते उत्सृजति वर्चइत्यनुवर्त्तनीयं पूतियथा भवति एवमम्लो
द्गाः हृत्कंठयोर्दाहः अरुचितृषाभिश्चाभिरर्दितः इदानीं सनिदानं श्लेष्मग्रहणीमाह गुर्वित्यादिभिश्चतुर्भिः।

वृंहिता अपक्वं धारयत्यन्नं पक्वं सृजति पार्श्वत इति सुश्रुतेनाप्युक्तं षष्ठी पित्तधरा नाम या कला परिकीर्तिता पक्वामा
शयमध्यस्था ग्रहणी सा प्रकीर्तितेति कलाधात्वंतरमर्यादा पक्वामाशयमध्यस्था पच्यमानाशयरूपेत्यर्थः कला
शयविशेषेण ग्रहणीं कथयितुं प्रथमं कलाशयानां स्थानान्याह मांसासृङ्मेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थ
की पंचमी च तथांत्राणां षष्ठी चाग्निधरा मता रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः श्लेष्माशय
स्यादुरसि तस्मादामाशयस्त्वधः ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः तस्योपरि तिलं ज्ञेयं तदधः
पक्वाशयः मलाशयस्त्वधस्तस्य वस्तिर्मूत्राशयः स्मृतः जीवरक्ताशयमुरो ज्ञेयाः सप्ताशयास्त्वमी आश
यस्थानं तस्य ग्रहणीरोगस्य तृष्णापिपासा आलस्यं कार्ये अनुत्साहः विदाहोन्नस्य अग्निमांद्यादा
हारविदग्धत्वं अत एव चिरात्पाकः अन्नस्यैव कायस्य गौरवं सामत्वात् वातग्रहण्या निदानपूर्वकं रूप
माह कटुतिक्तेत्यादि अतिशब्दः कटुतिक्तकषायैः सह संबध्यते संदुष्टभोजनं संयोगादिविरुद्धं संदुष्टभोजनैरि
त्यत्र शीतादिभोजनैरिति पाठांतरं प्रमितमल्पभोजनं प्रमतेति पाठांतरे विरुद्धान्नभोजनं अनशनमुपवासः अ
त्यध्वा अतिमार्गगमनं वेगनिग्रहो मूत्रपुरीषादीनां एभिः कारणैः कुपितो वायुर्ग्रहणीस्थं वह्निं संछाद्य संदू
ष्य गदान्करोति कान्गदान्करोतीत्याह तस्यान्नं पच्यते दुःखमिति शुक्तपाकं अम्लपाकं एतच्चाग्निमांद्य
जनितान्नविदाहाद्भवति खरांगता कर्कशांगता वातेन त्वग्गतस्नेहशोषात् तिमिरं मंददृष्टिता वंक्षणाः स

अथग्रहणी द्रवसरणसाधर्म्यात्स्वरभेदानुबंधित्वात्चातीसारानंतरं ग्रहणीं तस्याः संप्राप्तिमाह अतीसा
रइत्यादि अपिशब्दः समानतोऽतीसारस्यापि स्वहेतोर्ग्रहणीरोगः स्यादिति बोधयति अन्येत्वपिशब्दादनि
वृत्तेप्यतीसारे भवतीत्याचक्षते मेदोऽग्नेरित्यनेन हीनाग्नेरहितमपथ्यविकारकारीति बोधयति उ
क्तंहि दीप्ताग्नेर्विदग्धं विनत्यं भवेदिति भृशदीप्तः पुनरत्यर्थं वा दूषितः पूर्वमतीसारेपि दूषितत्वात्
भिभूषयेत्समेनाहूयन एतेन निवृत्तातीसारो विदग्धः ताभिप्यहिताहारपरिहारः कर्त्तव्य इति द्वित्रिव
जलाभादित्युक्तं भवति अतएवाह स्तुश्रुतः तस्मात्कार्यं परीहारस्त्वतीसारे विरतेपिवत् यावन्न प्रकृतिस्थः स्याद्दोष
तः प्राणतस्तथेति तस्याः संप्राप्तिपूर्वकं सामान्यलक्षणमाह एकैकशा इत्यादि मूर्च्छितैरति दुष्टैः मूर्छनो
र समूर्छनाययोरितिनिष्ठात्वर्थात उद्धितैरिति पाठांतरे स एवार्थः साग्रहणी दोषैर्दुष्टा सति भुक्तमाहारमाम
मपक्वमेव पक्वं विमुंचतीति दाराद्धश्चार्थे एवकारः समुच्चीयमानावधारणो यथा नरश्चनारायणामेवचादौ
सुतौ श्रुतौ द्वौ तत्र यावभूवुरिति अथवा एवकारो विकल्पार्थे निपातानामनेकार्थत्वात् सरुजं सशूलं
पूति दुर्गंधि वातेन मुहुर्बद्धं पित्तेन मुहुर्द्रवं कफेन च मुहुर्द्रवं ग्रहणीरोग इति ग्रहणाप रोग ग्रहणीरोगः ग्रहणी
अग्न्याधिष्ठानं यदाह चरकः अग्न्याधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता नाभेरुपरि सा ह्यग्निबलोपष्टंभ

3

२

100 १५७

॥श्री॥

॥मयूरपक्षनिंबस्यपत्राणिबृहतीफलं॥
मरीचंहिंगुमासीच्चबीजंकार्पाससंभवं॥
छागरोमाहिमर्कंकविष्ठावैगलिकीत
…॥गजदंतश्चतच्चूर्णकिंचिद्घृतविमि
श्रितं॥गेधहेधूपनंदत्तंसर्वान्वालग्र
हाञ्जयेत॥पिशाचानराक्षसाञ्जत्वा
सर्वग्रह… भवेत्॥इतिमाहेश्वरोधूपः॥

॥गंडमालौषध॥

॥यवसक्तुतिलायष्टीविष्ठापारावतस्यच॥
जलेनसहलेपोयंदुष्टगडंभिनत्यले॥

अनुभववृत

॥धा…बहताहोतालोबंप्रहोनेकीउपाय॥
॥पुरातनगुडेस्तुल्यंटंकणंसूक्ष्मपेषितं॥
॥…दत्तिपूरयेच्छीघ्रंब्रणनाडीव्रणापहं॥१

॥शीतज्वरकीअनुभव॥

चारमासाकासनीकोपीस्केमासाभरसेंधा
नोनमिलायकेचारपैंसेभरपानीमोछा
नुकेपी७दिनतकशीतज्वरजायगनिःसंदेह

॥भल्लातकीफलंहस्ताकेपिकच्छूकेबीजकं॥
तालंसिद्धार्थ८तेषांचूर्णधूपप्रभावनेः॥
…क्षणान्मत्कुणाः कीटः मूषका विषकीट
…ः॥पलायंतेगृहेमुक्ताः यथायुद्धेजि
…ताः॥मत्कुणादिनिवारणोपायः॥ षु

॥श्री॥

॥संग्रहौषधानी॥

…चकं रोमकं विडं कालमीठ

॥५॥